# shrIsUryastavarAjastotram

# સર્વરોગનાશક શ્રીસૂર્યસ્તવરાજસ્તોત્રમ્

## Document Information

Text title : sUryastavarAjastotram

File name : sUryastavarAjastotra.itx

Category : stavarAja, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Vineet Menon mvineetmenon at gmail.com

Proofread by : Vineet Menon mvineetmenon at gmail.com, NA

Latest update : May 30, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સર્વરોગનાશક શ્રીસૂર્યસ્તવરાજસ્તોત્રમ્

વિનિયોગઃ - ૐ શ્રી સૂર્યસ્તવરાજસ્તોત્રસ્ય શ્રીવસિષ્ઠ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીસૂર્યો દેવતા ।
સર્વપાપક્ષયપૂર્વકસર્વરોગોપશમનાર્થે પાઠે વિનિયોગઃ ।

ઋષ્યાદિન્યાસઃ - શ્રીવસિષ્ઠઋષયે નમઃ શિરસિ ।
અનુષ્ટુપ્છન્દસે નમઃ મુખે । શ્રીસૂર્યદેવાય નમઃ હૃદિ ।
સર્વપાપક્ષયપૂર્વકસર્વરોગાપશમનાર્થે પાઠે વિનિયોગાય નમઃ અઞ્જલૌ ।

ધ્યાનં -
ૐ રથસ્થં ચિન્તયેદ્ ભાનું દ્વિભુજં રક્તવાસસે ।
દાડિમીપુષ્પસઙ્કાશં પદ્માદિભિઃ અલઙ્કૃતમ્ ॥

માનસ પૂજનં એવં સ્તોત્રપાઠઃ -
ૐ વિકર્તનો વિવસ્વાંશ્ચ માર્તણ્ડો ભાસ્કરો રવિઃ ।
લોકપ્રકાશકઃ શ્રીમાન્ લોકચક્ષુ ગ્રહેશ્વરઃ ॥

લોકસાક્ષી ત્રિલોકેશઃ કર્તા હર્તા તમિસ્રહા ।
તપનઃ તાપનઃ ચૈવ શુચિઃ સપ્તાશ્વવાહનઃ ॥

ગભસ્તિહસ્તો બ્રધ્નશ્ચ સર્વદેવનમસ્કૃતઃ ।
એકવિંશતિઃ ઇત્યેષ સ્તવ ઇષ્ટઃ સદા મમ ॥

॥ ફલશ્રુતિઃ ॥

શ્રીઃ આરોગ્યકરઃ ચૈવ ધનવૃદ્ધિયશસ્કરઃ ।
સ્તવરાજ ઇતિ ખ્યાતઃ ત્રિષુ લોકેષુ વિશ્રુતઃ ॥

યઃ એતેન મહાબહો દ્વે સન્ધ્યે સ્તિમિતોદયે ।
સ્તૌતિ માં પ્રણતો ભૂત્વા સર્વ પાપૈઃ પ્રમુચ્યતે ॥

કાયિકં વાચિકં ચૈવ માનસં યચ્ચ દુષ્કૃતમ્ ।

એકજપ્યેન તત્ સર્વં પ્રણશ્યતિ મમાગ્રતઃ ॥

એકજપ્યશ્ચ હોમશ્ચ સન્ધ્યોપાસનમેવ ચ ।
બલિમન્ત્રોઽર્ઘ્યમન્ત્રશ્ચ ધૂપમન્ત્રસ્તથૈવ ચ ॥

અન્નપ્રદાને સ્નાને ચ પ્રણિપાતિ પ્રદક્ષિણે ।
પૂજિતોઽયં મહામન્ત્રઃ સર્વવ્યાધિહરઃ શુભઃ ॥

એવં ઉક્ત્વા તુ ભગવાનઃ ભાસ્કરો જગદીશ્વરઃ ।
આમન્ત્ર્ય કૃષ્ણતનયં તત્રૈવાન્તરધીયત ॥

સામ્બોઽપિ સ્તવરાજેન સ્તુત્વા સપ્તાશ્વવાહનઃ ।
પૂતાત્મા નીરુજઃ શ્રીમાન્ તસ્માદ્રોગાદ્વિમુક્તવાન્ ॥

ભગવાન્ સૂર્યનામાવલી
૧. વિકર્તન ૨. વિવસ્વાન્ ૩. માર્તણ્ડ ૪. ભાસ્કર ૫. રવિ
૬. લોકપ્રકાશક ૭. શ્રીમાન્ ૮. લોકચક્ષુ ૯. ગ્રહેશ્વર
૧૦. લોકસાક્ષી ૧૧. ત્રિલોકેશ ૧૨. કર્તા ૧૩. હર્તા ૧૪. તમિસ્રહા
૧૫. તપન ૧૬. તાપન ૧૭. શુચિ ૧૮. સપ્તાશ્વવાહન
૧૯. ગભસ્તિહસ્ત ૨૦. બ્રહ્મ ( બ્રહ્મા ) ૨૧. સર્વદેવનમસ્કૃત

ઇતિ ।

Encoded and proofread by Vineet Menon mvineetmenon at gmail.com

*shrIsUryastavarAjastotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*